**International Journal of Research in Social Sciences**
**Vol. 9, Issue 1, January - 2019,**
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# उपनिषदि फलमित्याख्यं लिङ्गम्

डॉ सत्यव्रत मिश्रः सहकारी शिक्षकः
बलाङ्गीरम्, ओाडिशा अनुसन्धाता(भू.पू)अद्वैतवेदान्ताविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः

तत्र विदितमेवेतत् समेषां दर्शनशास्त्रनिष्णातानां विदुषां यत् तात्पर्यनिर्णये षड्विधलिङ्गेषु फलमित्यस्यापि लिङ्गस्यान्तर्भावः विद्यन्ते। फलमपि प्रतिपादनीयस्य विषयस्य ज्ञातस्य तदज्ञानस्य वा प्रामाण्योपयोगी। अन्यथा हि प्रयोजनवदर्थावबोधकत्वघटितस्य प्रामाण्यस्य अभावप्रसङ्गत्वात्। अत एव काकदन्तबोधके वाक्ये प्रेक्षावतां न आदरः। वेदान्तानां प्रमेयस्य आत्मैक्यस्य आत्मबाधात्म्यस्य वा तदज्ञानस्य वा प्रयोजनम् अविद्यानिवृत्तिः इति पूर्वं दर्शितमेव। अत एव श्रुतिः 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः" (छा.उ.७.२६.२) इति श्रुतिः उपपद्यते। तमः शब्देन अविद्यायाः शोकादिकारणस्य उक्तेः। अत एव च भामत्याम् (१.१.१,पृ.६) 'संसारनिवृत्तिः अपवर्गः इह प्रयोजनं विवक्षितम्। संसारः च आत्मयातात्माननुभवनिमित्तः आत्म्याथत्म्यज्ञानेन निवर्त्तनीयः।" इत्यादि उक्त्वा तस्य असम्भवं पूर्वपक्षयित्वा निरस्य तं प्रयोजनं वेदान्तानां भवतीति स्थापितम्।

अत एव च काठकोपनिषद्भाष्ये (१.१) 'प्रयोजनं च अस्याः उपनिषदः आत्यन्तिकी संसारनिवृत्तिः ब्रह्मप्राप्तिलक्षणा" इति भाषितम्। माण्डुक्यभाष्ये अपि 'तत्र प्रयोजनन्तत्साधनाभिव्यञ्जकत्वेन अभिधेयसम्बद्धं शास्त्रं पारम्पर्येण विशिष्टसम्बन्धाभिधेयप्रयोजनवद्भवति। किं पुनः तत्प्रयोजनम् इति। तथा दुःखात्मकस्य आत्मनः द्वैतप्रपञ्चोपशमे स्वस्थता। अद्वैतभावः प्रयोजनम्। द्वैतप्रपञ्चस्य अविद्याकृतत्वात् विद्यया तदुपशमः स्यात् इति ब्रह्मविद्याप्रकाशनाय अस्य आरम्भः क्रियते" इति उपपाद्य 'यत्र हि द्वैतं इव भवति" (बृ.उ.४/५/१४), 'यत्र वा अन्यत् इव स्यात् तत्र अन्यः अन्यत् पश्येत" (बृ.उ.४.५.३१), 'यत्र तु अस्य सर्वम् आत्मैव अभूत् तत् केन कं पश्येत् केन कं विजानीयात्"( बृ.उ.२.४.१४) इत्यादि श्रुतिभ्यः अस्य अर्थस्य सिद्धिः इति प्रमाणम् अपि अभिहितम्।

तदनेन उपपउदेन भगवत्पादानाम् एषः आशयः उन्नीयते यत् सर्वत्र प्रमाणजनीत्रेव ज्ञानेन प्रयोजनं भवति चेत् प्रमेयस्यापि प्रयोजनं वर्णयितुं शक्यम्। तद्वारा प्रमाणस्य प्रयोजनं प्रयोजनवदर्थावबोधकत्वघटितप्रामाण्यस्यैव वा उपपत्तिः। तच्च फलं प्रकृते अविद्यानिवृत्तिः एव। नतु तदतिरिक्तं फलं वक्तुं शक्यं प्रमाणाभावात् इति। ततश्च वेदान्तानां तत्प्रमेयस्य च प्रयोजनं सिध्यति। अविद्यानिवृत्यतिरिक्तस्य प्रयोजनस्य असम्भवतः तु समन्वयसूत्रभाष्यादिषु (ब्र.सू.भा.१.१.४) तत्र तत्र अन्यत्र च व्यक्तः प्रतिपादितः तदेवं फलं तात्पर्यलिङ्गमिति सिद्धम्।

**उपेक्षामपि हि फलं प्रमाणस्य प्रचक्षते।**
**अपि चाज्ञानतः शोकी दुःखी जीवः प्रकाशते।।**

आत्मविदः फललिङ्गेन यदुच्यते तत् अविद्यानिवर्त्तनेन जायमानमेव भवति। यतोहि अज्ञानेनाविद्यया वा जीवः 'अहं सुखी" 'अहं दुःखा"r 'अहमिदं ममेद"ं इत्यादि स्वात्मनि कल्पयति। सुखेन रममाणो भूत्वा दुःखातिदुःखास्थित्यापन्ने दुःख्याति। दुःखबागिव भाति। विज्ञाने च सति शोकदुःखयोनिवृत्तिः यदा जायते।ततो विज्ञानं स्वयमेव पुरुषार्थो मन्यते। उक्तं च ग्रन्थातरे –

**अनुभूयाहमद्वैतं ब्रह्म नित्यं निरन्तरम्।**
**अहं ज्ञानमनन्तं तन्न चापेक्षेऽपरं क्वचित्।। (यो.कौ.१३)**

स्वात्मनि नित्ये ब्रह्मणि शुद्धबुद्धमुक्तस्वाभावे अविद्याकार्यतं सर्वमपि परिभूय अन्यथोपकल्पनं तु न श्रेयसे मोक्षाय स्वानुभवाय। यतोहि कार्यद्वयमती आवरणविक्षेपशक्तिभ्यां सुखदु:खादिकं अनुभवतीति।
उदितं चाचार्यशङ्करेण –

**अहो मयि स्थितं विश्वं वस्तुतो न मयि स्थितम्,**
**न मे बन्धोऽस्ति मोक्षो या भ्रन्ति: शान्ता निराश्रया।।**

सर्वेषामपि वेदान्तवाक्यानां अद्वैते ब्रह्मणि तात्पर्यम्। परं तु यदा तस्य ऐक्यं प्रतपाद्यते, तदा अत्र विद्यमाने मन्त्रे ब्रह्मज्ञानमेव फलत्वेनोक्तमस्ति।

अविद्यया खलु जीव: स्वात्मानमविज्ञाय 'अहं शोकी" 'अहं मूढ:" 'अहं ब्रह्मण:" क्षत्रियोऽहमित्यादिषु भवेषु सम्परिष्वक्त: सन् शोकमोहाद्यविद्याकृतां अनुभवति। तथा च कर्मानुष्ठानेन सुखदु:खे अनुभुनक्ति। यावता तस्य शास्त्रगुरुपदिष्टज्ञानेन तस्योपाधिभङ्ग: नाम अविद्या निवृत्तिर्न भवति, तावता तस्य श्रवणमननिदिध्यासनादिभिरनुष्ठानं भवति, तदा स्वात्मानं 'अहं ब्रह्मास्मीति" तत्वं विबुध्य नाहं कत्ता७ नाहं भोक्ता, नाहं ब्रह्मणक्षत्रियादि, नामदेहाभिभूत देही,चित्स्वरूपानन्दोऽहमित्थनुसंजानाति। सर्वत्राखिलाधारमात्मतत्त्वं पश्यत: कुतो मोह: कुत: शोक: इत्यादि मन्त्रोक्तं सत्यमेव वच:। अत एवोच्यते

**यस्मिन् ब्रह्मस्वरूपे तु ब्रह्मतत्त्वं परेऽव्यये।**
**सर्वाण्यात्मैव संवृतं ब्रह्मतत्त्वं विजानात्:।। (ईशा.रहस्यम्.३)**
**ब्रह्मैव सकलं विश्वमहमस्मीति तत्पदम्।**
**पद्यते गम्यते नित्यं स्वस्वरूपं स्वयं प्रभम्।।**
**शोकमोहादि संवन्धतरस्तस्थिन्नेव तु विद्यते।**
**अप्राणो ह्यमना शुभ्र इत्यादिश्रुतिशासनात्।।**

योऽधिकारी पूर्वोक्तप्रकारेणात्मानं पश्यति स ईद्दशमात्मानं विज्ञानानन्दस्वभावं प्राप्नोति। श्रुतिरपि तदेव निगदति -

**सर्वभूरस्थमात्मानं सर्वभूतानि चात्मनि।**
**संपश्यन् ब्रह्म परमं याति नान्येन हेतुना।।**
**मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।**
**मयि सर्वं लयं याति त्ब्रह्माद्वयमस्म्यहम्।।**

तदा स्वात्मव्यतिरिक्तं न किमपि संविज्जायते। न त्वेकत्वभवनमत्र संख्यापरिकल्पनम्। व्यापकत्वात् नित्यत्वाच्च आत्मन: न चैकं तदन्यत् द्वितीयं कुत:स्यादिति भगवत्पादौक्तदिशा सति सम्भवे अन्येषां संख्ययोपदेश: कर्तुं शक्य: तदात्मनस्य तु तदपि कर्तुं अशक्यत्वात् न चैकमिति आशय: प्रकटिता। तथा चोक्तं महर्षिपतञ्जलिना-

तदा द्रष्टु: स्वरूपेऽवस्थानम् इति। अत्र द्रष्टुत्वेन विदुषामात्मतत्त्वदर्शनेन च साम्यमवगन्तुं शक्यम्। सर्वेषामपि बाह्यान्त: करणानामुपरमात् तदेकात्मतत्त्वस्यावशिष्टत्वात् च स्वस्यरूपावाप्तिरुक्ता। पुनश्चात्र प्रामानान्तरं प्रदर्श्यते –

**तस्माज्ज्ञानं पुरस्कृत्य सन्यसेदिह तत्त्ववित्।**
**स्वात्मानं परमं ज्ञात्वा मुच्यते जन्मबन्धनात्।।**

जननमरणमुभयमपि ध्रुवमिति तच्च अविद्यया प्रवर्तनाद् योऽन्यन्तरप्रतिपत्ति तत्र कर्मफलभोगश्च श्रुतिसम्पतमेव। सर्वत्र हि अविद्या ज्ञान निबन्धनीति प्रस्द्धि:, तेन च किमायातमित्युक्तौ अनाद्यविद्ययाबद्ध: सन् स्वरूपात्मविज्ञाने अशक्तो जीव इति व्यवह्रियते। तच्च ज्ञाननिवर्त्य एव अत्रोच्यते –

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। इत्यत्र कर्मफलभोगाय देहमनोऽस्तु अन्तकरणानामुत्पत्तौ जन्म जन्तुरिति वा कथ्यते। तेन च अहंकारादि सम्बद्धोजीव: नात्मानं वेत्ति। इह च आत्मस्वरूपस्य जनिमृती न सम्भवत: नित्यचैतन्यस्वरूपस्य। तत्सर्वमिदमविद्याकल्पनमिति दर्शयन्नाचार्य आह –

**न कश्चिज्जायते जीव: संभवोऽस्य न विद्यते।**
**एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते।।**


सन्दर्भग्रन्थसूची

१. छान्दोग्योपनिषद् – शाङ्करभाष्यम्- गीताप्रेस गोरखपुर- २००१
२. ब्रह्मसूत्रशाङ्करभाष्यम्- भामतीटीकोपेता चौखम्बा संस्कृत प्रकाशन वाराणसी
३. काठकोपनिषद्भाष्यम् – आनन्दाश्रम मुद्रणालय पुणे- १९२२
४. बृहदारण्यकोपनिषद् - शाङ्करभाष्यम्- गीताप्रेस गोरखपुर
५. ब्रह्मसिद्धि: - चौखम्बा संस्कृत प्रकाशन वाराणसी
६. ईशाचास्यभाष्यम् – उराटाचार्यकृतम् - आनन्दाश्रम मुद्रणालय पुणे- १९२२
७. माण्डुक्योपनिषद्- श्रीगौडपादकारिकोपेता- आनन्दाश्रम मुद्रणालय पुण-१९३६
८. योगसूत्रम् – महर्षिपतञ्जलिप्रणीतम् – वलदेव मिश्र टिका - चौखम्बा संस्कृत प्रकाशन वाराणसी
९. सिद्धान्तविन्दु: - (दशश्लोकी)- राष्ट्रिय संस्कृत संश्थान मनित विश्वविद्यालय जनकपुरी नवदेहली